"नभश्च नभस्यश्च वार्षिकावृतू" यजु०। ऋतुशब्दे १४२२ पृ० अस्य सौरचान्द्रत्वविकल्पश्च दृश्यः।

**प्रावृषायणी** स्त्री प्रावृषा अयनं यस्याः गौरा० ङीष्। कपिकच्छ्वाम् (आलकुशी) अमरः।

**प्रावृषिक** पुंस्त्री प्रावृषि कायति शब्दायते कै—क अलुक् स०। १मयूरे धरणिः। स्त्रियां जातित्वात् ङीष्। प्रावृषि भवः ठञ्। २वर्षाकालभवे त्रि० स्त्रीयां ङीप्।

**प्रावृषिज** पु० प्रावृषि जायते जन—ड अलुक् स०। १झञ्झानिले त्रिका०। २वर्षाकालजाते त्रि० "जे विभाषा" वा अलुक् स०। तेन प्रावृड्ज तत्रार्थे त्रि०।

**प्रावृषीण** त्रि० प्रावृषि भवः बा० ख। वर्षाकालभवे ऋ०७।१०३।७ भाष्य्।

**प्रावृषेण्य** त्रि० प्रावृषि भवः एन्य। १वर्षाकालजाते २कदम्बवृक्षे पु० मेदि०। ३कुटजवृक्षे ४धाराकदम्बे च पु० राजनि०। ५कपिकच्छ्वाम् ६रक्तपुनर्नवायां स्त्री राजनि०। प्रावृषि दीयते कार्यं वा एन्य। ७वर्षाकाले देये करादौ ८तत्र कार्ये च त्रि०। ९प्राचुर्य्ये न० शब्दर०।

**प्रावृषेय** पु० १देशभेदे भा०भी०९अ०। प्रावृषायां भवः ढक्। २वर्षाकालभवे त्रि० स्त्रियां ङीप्।

**प्रावृष्य** पु० प्रावृषि भवः बा० यत्। १धाराकदम्बे २कुटजे ३विकङ्कतवृक्षे च राजनि०।

**प्रावेशन** त्रि० प्रवेशने दीयते कार्यं वा व्युष्टा० अण्। १प्रवेशने दीयमाने २तत्कार्य्ये च। [ङीप्।

**प्रावेशिक** त्रि० प्रवेशाय साधुः ठञ्। प्रवेशसाधने स्त्रियां

**प्राशन** न० प्र+अश—भावे ल्युट्। अन्नादेः प्रकर्षेण भोजने अन्नप्राशनम्।

**प्राशस्त** न० प्रशास्तुर्भावः कर्म वा उद्गा० अञ्। प्रशास्तुर्ऋत्विजः कर्मणि १शास्त्रशंसने २तद्भावे च।

**प्राशित** त्रि० प्र+अश—भोजने कर्मणि क्त। १भक्षिते। भावे क्त। २भक्षणे न० ३पितृयज्ञे तर्पणे जटा० "प्राशितं पितृतर्पणम्" मनुना तत्रार्थे परिभाषितत्वात्।

**प्राशित्र** न० यज्ञिये यवमात्रे पिप्पलमात्रे वाऽवत्ते ब्रह्मोद्देश्यके भागे शिष्टाशभेदे "शिष्टात् प्राशित्रावदानम्" कात्या० ११९७। "मित्रस्य त्वा चक्षुषा प्रतीक्ष इति प्राशित्रं प्रतीक्षते" २।२।१५ "प्राशित्रमवदीयमानमाङ्क्षमाणं च प्राशित्रं ब्रह्मणो भागः यवमात्रं पिप्पलमात्रं वाऽवत्तः" कर्कः "स यत् प्राशित्रमवद्यति" इत्युपक्रमे। अथास्मै ब्रह्मभागं पर्य्याहरन्ति। ब्रह्मा वै यज्ञस्य दक्षिणत आस्तेऽभिगोप्ता स एतं भागं प्रतिविदान आस्ते यत् प्राशित्रं तदस्मै पर्य्याहार्षुस्तत्प्राशीदथ यमस्मै ब्रह्मभागं पर्य्याहरन्ति तेन भागी स यदतऊर्द्ध्वमसंस्थितं यज्ञस्य तदभिगोपायति तस्माद्वा अस्मै ब्रह्मभागं पर्य्याहरन्ति" शत०ब्रा० १।७।४।१८

**प्राशित्राहरण** प्राशित्रं ह्रियतेऽनेन हृ—करणे ल्युट्। प्राशित्ररूपभागहरणसाधने गोकर्णाकृतिपात्रभेदे शत० ब्रा० १।२।१।६ भाष्यम्।

**प्राशु** पु० प्र+अश—भोजने उण्। भक्षणे प्राशवे हितः यत्। प्राशव्य प्रकृष्टभक्षणहिते ऋ० ८।२१।६ भा०। प्रा०स०। २प्रकृष्टशीघ्रे निघण्टुः। [यजु०२४।२७

**प्राशृङ्ग** त्रि० प्रकृष्टं शृङ्गमस्य वेदे दीर्घः। प्रकृष्टशृङ्गयुक्ते

**प्राश्निक** पु० प्रश्नाय तदुत्तरदानाय साधु ठक्। १सभ्ये त्रिका० २प्रश्नोत्तरदानाय साधौ त्रि०।

**प्राश्नीपुत्र** पु० यजुर्वेदवंशस्थे ऋषिभेदे शत०ब्रा० १४।९।४।३२

**प्राष्टवर्ण** पु० प्रकर्षेण अष्टः प्राप्तो वर्णः। पृश्निवर्णे नभआवर्णे निरु० १०।३९

**प्रास** पु० प्रास्यते प्र+अस—क्षेपे कर्मणि घञ्। कुन्तास्त्रे अमरः। कुन्तशब्दे २००१८ पृ० दृश्यम्।

**प्रासक** पु० प्रास+संज्ञायां कन्। पाशके हेमच० तस्य देवकैः क्षिप्यमाणत्वात् तथात्वम्। स्वार्थे क। २प्रासास्त्रे पु०।

**प्रासङ्ग** पु० प्र+सन्ज—कर्मणि घञ् दीर्घः। दम्यवत्सानां स्कन्धे शिक्षार्थमासज्यमाने युगभेदे अमरः। तं वहति यत्। प्रासङ्ग्य तद्वाहके दम्यवृषे अमरः।

**प्रासङ्गिक** त्रि० प्रसङ्गादागतः ठञ्। प्रसङ्गागते स्त्रियां ङीप्।

**प्रासाद** पु० प्रसीदत्यस्मिन् प्र+सद—आधारे घञ् दीर्घः। देवनृपयोर्गृहे अमरः देवगृहशब्दे ३६७८ पृ० दृश्यम्।

**प्रासादकुक्कुट** पुंस्त्री० प्रासादे कुक्कुट इव। पारावते त्रिका० स्त्रियां जातित्वात् ङीष्।

**प्रासिक** पु० प्रासः प्रहरणमस्य ठक्। कुन्तेन योद्धरि अमरः

**प्रास्तारिक** त्रि० प्रस्तारे व्यवहरति ठक्। प्रस्तारे व्यवहारिणि। [ध्यादौ मङ्गलद्रव्ये स्त्रियां ङीप्।

**प्रास्थानिक** त्रि० प्रस्थाने साधु ठञ्। यात्रिके मङ्गल-

**प्रास्थिक** त्रि० प्रस्थस्य वापः ठञ्। १प्रस्थमितधान्यवपनाधारे क्षेत्रे २भूमौ स्त्री ङीप्। प्रस्थं सम्भवति (तस्मिन् समावेशयति) अवहरति पचति वा ठञ्। प्रस्थमितधान्यादेः तस्मिन् ३समावेशके ४अवहारके ५पाचके च त्रि० स्त्रियां ङीप्। प्रस्थः परिमाणमस्य ठञ्। ६प्रस्थपरिमाणयुक्ते